# १९. पादुका सहस्रम् - मरकत पद्धतिः (२०)

वन्दे गारुत्मतीं वृत्त्या मणिस्तोमैश्च पादुकाम् ।
यया नित्यं तुलस्येव हरितत्वं प्रकाश्यते ॥ १९.१॥ ६६१॥

सविलास गतेषु रङ्गभर्तुः
त्वदधीनेषु बहिष्कृतो गरुत्मान् ।
अधिगच्छति निर्वृतिं कथञ्चित्
निजरत्नैस्त्वयि पादुके निविष्टैः ॥ १९.२॥ ६६२॥

समये मणिपादुके मुरारेः
मुहुरन्तः पुर मुग्ध चेटिकास्ते ।
हरितान् हरिदश्मनां मयूखान्
तुलसी पल्लव शङ्कया क्षिपन्ति ॥ १९.३॥ ६६३॥

हरितः सहसा हरिन्मणीनां
प्रभया रङ्गनरेन्द्र पादरक्षे ।
तुलसीदल सम्पदं दधाति
त्वयि भक्तै र्निहितः प्रसूनराशिः ॥ १९.४॥ ६६४॥

प्रसादयन्ती मणिपादुके त्वं
विक्षेप योगेन विहार वेलाम् ।

हरिन्मनोज्ञा हरिकान्ति सिन्धोः
सन्दृश्यसे शैवल मञ्जरीव ॥ १९.५॥ ६६५॥

बध्नासि रङ्गेश्वर पादरक्षे
हरिन्मणीनां प्रभया स्फुरन्त्या ।
चूडापदेषु श्रुति सुन्दरीणां
माङ्गल्य दूर्वाङ्कुर माल्य पङ्क्तिम् ॥ १९.६॥ ६६६॥

अच्छेद्य रश्मि नियतै र्घटिता हरिद्भिः
सद्वर्त्मना गतिमती मणिपादरक्षे ।
सन्दृश्यसे सवितृ मण्डल मध्यभाजो
रङ्गेश्वरस्य रथसम्प दिवापरा त्वम् ॥ १९.७॥ ६६७॥

श्यामायमान निगमान्त वनोप कण्ठाः
स्थाने पदावनि हरिन्मणय स्त्वदीयाः ।
पर्यन्त शाद्वलवतीं प्रथयन्ति नित्यं
नारायणस्य रुचिरां नखरश्मि गङ्गाम् ॥ १९.८॥ ६६८॥

उद्दिश्य कामपि गतिं मणिपादरक्षे
रङ्गेश्वरस्य चरणे विनिवेशितात्मा ।
प्रायो हरिन्मणिरुचा दृढभक्ति बन्धा
प्रादुष्करोति भवती तुलसी वनानि ॥ १९.९॥ ६६९॥

सेवार्थ मागतवतां त्रिदशेश्वराणां
चूडामणि प्रकरशालिषु मौलिषु त्वम् ।
संवर्तय स्यसुरमर्दन पादरक्षे
स्वेनाश्म गर्भ महसा शुकपङ्क्ति शोभाम् ॥ १९.१०॥ ६७०॥

दर परिणत दूर्वा वल्लरी निर्विशेषैः
मरकत शकलानां मांसलै रंशुजालैः ।
पशुपति विधृता त्वं तस्य पाणौ निषण्णं
मधुरिपु पदरक्षे वञ्चयस्येणशावम् ॥ १९.११॥ ६७१॥

हरिचरण सरोज न्यास योग्यं भवत्याः
प्रगुण मभिलषन्त्यो वर्णलाभं तुलस्यः ।
प्रतिदिन मुपहारैः पादुके तावकानां
मरतक शकलाना माश्रयन्ते मयूखान् ॥ १९.१२॥ ६७२॥

हरित मणि मयूखै रञ्जिता ध्यात्म गन्धैः
दिशसि चरणरक्षे जात कौतूहला त्वम् ।
दनुज मथन लीला दारिकाणा मुदारां
दमनक दल पङ्क्तिं देवि मौलौ श्रुतीनाम् ॥ १९.१३॥ ६७३॥

अधिगत बहुशाखै रश्मगर्भ प्रसूतैः

मधुरिपु पदरक्षे मेचकै रंशुजालैः ।
अनितर शरणानां नून मारण्यकानां
किमपि जनयसि त्वं कीचकारण्य दुर्गम् ॥ १९.१४॥ ६७४॥

प्रचुर निगम शाखां पादुके रङ्गिणस्त्वां
चरण नखमयूखै श्चारु पुष्पानुबन्धाम् ।
मरतक दलरम्यां मन्महे सञ्चरन्तीं
कनक सरिदनूपे काञ्चि दुद्यान लक्ष्मीम् ॥ १९.१५॥ ६७५॥

नखकिरण निकायै र्नित्य माविर्मृणाले
महित रस विशेषे मेचकै रंशुभिस्ते ।
परिकलयसि रम्यां पादुके रङ्गभर्तुः
पदकमल समीपे पद्मिनी पत्र पङ्क्तिम् ॥ १९.१६॥ ६७६॥

अनिमिष युवतीना मार्तना दोपशान्त्यै
त्वयि विनिहित पादे लीलया रङ्गनाथे ।
दधति चरणरक्षे दैत्य सौधानि नूनं
मरकत रुचिभिस्ते मङ्क्षु दूर्वाङ्कुराणि ॥ १९.१७॥ ६७७॥

विपुल तम महोभि र्वीत दोषानुषङ्गं
विलस दुपरि नैल्यं देवि विष्णोः पदं तत् ।
पृथु मरकत दृश्यां प्राप्य पादावनि त्वां

प्रकटयति समन्तात् संप्रयोगं हरिद्भिः ॥ १९.१८॥ ६७८॥

पद्माभूम्योः प्रणय सरणि र्यत्र पर्यायहीना
यत्संसर्गा दनघ चरिताः पादुके कामचाराः ।
तारासक्तं तमिह तरुणं प्रीणयन्ते जरत्यो
नित्य श्यामा स्तव मरतकै र्नून माम्नायवाचः ॥ १९.१९॥ ६७९॥

स्थलकमली नीव काचित् चरणावनि भासि कमल वासिन्याः ।
यन्मरतकदल मध्ये यः कश्चिदसौ समीक्ष्यते शौरिः ॥ १९.२०॥ ६८०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
मरतक पद्धति रेकोनविंशी ॥